# संकटमोचन श्रीहनुमान स्तोत्र

ॐ नमो वायुपुत्राय भीमरुपाय धीमते ।
नमस्ते रामदूताय कामरुपाय श्रीमते ॥१॥
मोहशोकविनाशाय सीताशोकविनाशिने ।
भग्नाऽशोकवनायास्तु दग्धलंकाय वांग्निने ॥२॥
गतिनिर्जितवाताय लक्ष्मणप्राणदाय च ।
वनौकसां वरिष्ठाय वसिने वनवासिने ॥३॥
तत्वज्ञानसुधासिन्धुनिमग्नाय महियसे ।
आंजनेयाय शूराय सुग्रीवसचिवाय ते ॥४॥
जन्ममृत्युभयग्नाय सर्वक्लेशहराय च ।
नेदिष्ठाय प्रेतभूतपिशाचभयहारिणे ॥५॥
यातनानाशनायास्तु नमो मर्कटरुपिणे ।
यक्षराक्षसशार्दूलसर्पवृश्चिक-भी हृते ॥६॥
महाबलाय वीराय चिरञ्जीविन उद्धते ।
हारिणे वज्रदेहाय चोल्लंघितमहाब्धये ॥७॥
बलिनामग्रगण्याय नमो नः पाहि मारुते ।
लाभदोऽसि त्वमेवाशु हनुमन राक्षसान्तक ॥८॥
यशो जयं च मे देहि शत्रुन नाशय नाशय ।
स्वाश्रितानामभयंदं य एव स्तौति मारुतिम् ।
हानिः कुतो भवेत् तस्य सर्वत्र विजयी भवेत् ॥९॥

ॐ श्री रामदूताय हनुमंताय महाप्राणाय महाबलाय नमो नमः ॥

हरि ॐ